सुखं करिष्यमाणत्वेनास्यस्येति। अच्। अभ्युदयप्रारम्भयुक्ते, त्रि। यथा, रामायणे। २। ८१। १।
"ततो नान्दीमुखीं रात्रिं भरतं सूतमागधाः।
तुष्टुवुः सविशेषज्ञास्तवैर्मङ्गलसंस्तवैः॥")

नान्दीवादी, [ न् ] त्रि, (नान्दीं वदतीति। वद+णिनिः।) नान्दीश्लोकपाठकारी। नान्दीवदनशील:। भेरीवादनशीलः। इत्यमरटीकायां भरतः॥

नापितः, पुं, ( न आप्नोति सरलतामिति। न+आप्+"नञ्याप इट् च।" उणां ३। ८७। इति तन् इट् च।) वर्णसङ्करजातिविशेषः। स तु पट्टिकायां कुवेरिणो जातः। इति पराशरपद्धतिः॥ शूद्रायां क्षत्रियाज्जातः। इति विवादार्णवसेतुः॥ तस्य क्षौरं कर्म्म। तत्पर्य्यायः। क्षुरी २ मुण्डी ३ दिवाकीर्त्तिः ४ अन्तावसायी ५। इत्यमरः।२।१०।१०॥ क्षुरी ६ वातुसीसुतः ७ नखकुट्टः ८ ग्रामणीः ९। इति शब्दरत्नावली॥ चण्डिलः १० मुण्डः ११ भाण्डपुटः १२। इति जटाधरः॥ (यथा, पञ्चतन्त्रे। ३। ७३।
"नराणां नापितो धूर्त्तः पक्षिणाञ्चैव वायसः।
दंष्ट्रिणाञ्च शृगालस्तु श्वेतभिक्षुस्तपस्विनाम्॥")

नापितशालिका, स्त्री, ( नापितस्य शालिका गृहम्।) नापितशाला॥ नापितगृहम्। तत्पर्य्यायः। खरकुटी २। इति त्रिकाण्डशेषः॥

नाभिः, पुं, ( नह्यते बध्नाति विपक्षादीनिति। नह बन्धे+"नहो भश्च।" उणां ४। १२५। इति इञ् भश्चान्तादेशः।) मुख्यनृपः। चक्रमध्यम्। ( यथा, पञ्चतन्त्रे। १। ९३।
"अरैः सन्धार्य्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः।
स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्त्तते॥")
क्षत्रियः। इति मेदिनी। भे,५॥ प्रियव्रतराजपौत्रः। ( अग्नीध्रस्य पुत्रः। यथा, ब्रह्माण्डे। ३५ अध्याये।
"तस्य पुत्रा बभूवुस्तु प्रजापतिसमा नव।
ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः॥"
"नाभये दक्षिणं वर्षं हिमवन्तं पिता ददौ॥")
गोत्रम्। इति संक्षिप्तसारोणादिवृत्तिः॥ (प्रधानम्। इति विश्वः॥ यथा, रघुः। १८। २०।
"सुतोऽभवत् पङ्कजनाभकल्पं
कृत्स्नस्य नाभिर्नृपमण्डलस्य॥"
महादेवः। यथा, महाभारते। १३। १७। ६२।
"नाभिर्नन्दिकरो भावः पुष्करः स्थपतिः
स्थिरः॥")

नाभिः, पुं स्त्री, (नह बन्धे+इञ् भश्चान्तादेशः।) प्राण्यङ्गम्। इति मेदिनी। भे, ६॥ नाइ इति भाषा। तत्पर्य्यायः। नाभी२ तुन्दकूपी३। इति शब्दरत्नावली॥ उदरावर्त्तः ४। इति राजनिर्घण्टः॥ ( यथा, पञ्चदश्याम्। ६। ११७।
"विष्णुर्नाभेः समुद्भूतो वेधाः कमलजस्ततः।
विष्णुरेवेश इत्याहुर्लोके भागवता जनाः॥")

"९ च गर्भस्थस्य सप्तभिर्म्मासैर्भवति।" इति सुखबोधः॥ ("तस्य चेन्नाभिः पच्येत तां लोध्रमधुकप्रियङ्गुदारुहरिद्राकल्कसिद्धेन तैलेनाभ्यज्यादेषामेवतैलौषधानां चूर्णेनावचूर्णयेदेषनाडीकल्पनविधिरुक्तः सम्यक्॥" इति चरके शरीरस्थाने अष्टमेऽध्याये॥) अस्मिन् स्थाने मणिपुरनामदशदलपद्ममस्ति। यथा,—
"तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभम्।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः॥
मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्।
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम्॥"
इति तन्त्रम्॥
कस्तूरिकामदे, स्त्री। इति मेदिनी। भे, ६॥

नाभिकण्टकः, पुं, (नाभेः कण्टक इव।) आवर्त्तः। इति शब्दरत्नावली॥ गोँड़ इति भाषा॥

नाभिका, स्त्री, (नाभिरिव कायतीति। कै+कः।) कटभीवृक्षः। इति राजनिर्घण्टः॥

नाभिगुड़कः, पुं, (नाभौ गुड़को गोलः।) स्फीतनाभिः। गोँड़ इति भाषा। तत्पर्य्यायः। गर्भण्डः २। इति त्रिकाण्डशेषः॥ नाभिकण्टकः ३ आवर्त्तः ४। इति शब्दरत्नावली। गोण्डः ५ नाभिगोलकः ६। इति जटाधरः॥

नाभिगोलकः, पुं, (नाभौ गोलकः।) नाभिगुड़कः। इति जटाधरः॥

नाभिजः, पुं, ( नाभौ जायते इति। जन्+डः।) ब्रह्मा। इति धरणिः॥

नाभिजन्मा, [ न् ] पुं, ( नाभौ जन्म यस्य।) ब्रह्मा। इति त्रिकाण्डशेषः॥

नाभिनाला, स्त्री, ( नाभिस्थिता नाला नाड़ी।) नाभिसम्बन्धिनी नाडी। तत्पर्य्यायः। अमला २। इति त्रिकाण्डशेषः॥ (यथा, रघुः।५।७।
"तदङ्गशय्याच्युतनाभिनाला
कच्चित् मृगीनामनघा प्रसूतिः॥")

नाभिभूः, पुं, ( नाभौ भूरुत्पत्तिर्यस्य।) ब्रह्मा। इति हेमचन्द्रः। १। १२७॥

नाभिवर्षः, पुं, (नाभेरग्नीध्रपुत्रस्य वर्षः।) भारतवर्षः। यथा, "योऽसौ मनुपुत्रः प्रियव्रतो नाम सप्तद्वीपाधिपतिर्बभूव तस्य चाग्नीध्रादयो दश पुत्रा बभूवुः त्रयः प्रव्रजिताः शिष्टानां सप्तानां सप्त द्वीपाः पित्रा दत्ताः। तत्र जम्बुद्वीपाधिपतेराग्नीध्रस्य नव पुत्रा बभूवुः।
नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः।
रम्यो हिरण्मयश्चैव कुरुर्भद्राश्वकेतुमान्॥
नव वर्षाणि तेभ्यः पित्रा दत्तानि वनं प्रविशता चाग्नीध्रेण। हिमालयस्याधिपतेर्नाभेर्ऋषभः पुत्रो बभूव ऋषभाद्भरतः भरतेन चिरकालं धर्म्मेण शासितत्वादिदं भारतं वर्षमभूत।" इति नारसिंहे ३० अध्यायः॥

नाभी, स्त्री, ( नाभि+वा ङीष्।) नाभिः। इति शब्दरत्नावली॥ (यथा, आर्य्यासप्तशत्याम्। ६०८।
"स्तनजघनमधिकगौरं नाभीमूलं निरंशुकं कृत्वा।
अनघ! सेवित पवन त्वं किं कृतमलयभृगुपातः॥")

नाभीलं, क्ली, ( नाभीं लातीति। ला+कः।) नार्य्या वङ्क्षणः। कृच्छ्रम्। गर्भाण्डम्। इति मेदिनी। ले, १०१॥ नाभिगाम्भीर्य्यम्। इति हेमचन्द्रः॥

नाभ्यं, त्रि, ( नाभेरिदमिति। नाभि+यत्।) नाभिसम्बन्धि। इति व्याकरणम्॥ ( यथा, भागवते। ३। ४। १३।
"पुरा मया प्रोक्तमजाय नाभ्ये
पद्मे निषण्णाय ममादिसर्गे॥"
नाभये हितम्। "शरीरावयवात् यत्।" ५।१।६। इति यत्। "नाभि नभञ्च।" ५। १। २। इत्यस्य वार्त्तिकोक्त्या नाभेर्नभादेशस्तु न भवति। अस्य गवादितया सन्नियोगशिष्टत्वात् रथनाभावेव प्रवृत्तेः। नाभिस्थिते च॥ महादेवे, पुं। यथा, महाभारते। १२। १८४। १६।
"नमो नाभाय नाभ्याय नमः कटकटाय च॥")

नाम,अ,(नामयतीति नाम्यतेऽनेन वा। नम+णिच्+बाहुलकात् डः।) प्राकाश्यम्। सम्भावना। क्रोधः। उपगमः। कुत्सनम्। इत्यमरः।३।३। २५०॥ प्रकाश्ये यथा। हिमालयो नाम नगाधिराजः। हिमालयः प्रकाशोऽतिप्रसिद्ध इत्यर्थः॥ सम्भाव्ये सम्भावनागाम् इह नाम सीता भविष्यति॥ क्रोधे ममापि नाम दशाननस्य परैरभिभवः॥ उपगमः साध्वयोऽङ्गीकारः एवं नामास्तु॥ कुत्सने को नामायं सवितुरुदये स्वापमेवं विधत्ते॥ विस्मये च। अन्धो नाम गिरिमारोहति॥" इति तट्टीकायां भरतः॥ स्मरणम्। विकल्पः। इति मेदिनी। मे, ५३॥

नाम, [ न् ] क्ली, म्नायते अभ्यस्यते यत् तत्। ( म्ना अभ्यासे+"नामन् सीमन् व्योमन्निति।" उणां ४। १५०। इति मनिन्प्रत्ययेन निपातनात् साधुः।) संज्ञा। तत्पर्य्यायः। आख्या २ आह्वा ३ अभिधानम् ४ नामधेयम् ५। इत्यमरः।१।६।८॥ आह्वानम् ६ लक्षणम् ७ व्यपदेशः ८ आह्वयः ९ संज्ञा १० गोत्रम् ११ अभिख्या १२। इति शब्दरत्नावली॥ लिङ्गम्। तच्च स्यादिविभक्त्यर्हः शब्दः। तत्तु पञ्चविधं यथा,—
"उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्।
शब्दानुकरणञ्चैव नाम पञ्चविधं स्मृतम्॥"
इति गोयीचन्द्रः॥
अवक्तव्यनामानि यथा,—
"आत्मनाम गुरोर्नाम नामानि कृपणस्य च।
प्राणान्तेऽपि न वक्तव्यं ज्येष्ठपुत्रकलत्रयोः॥"
इति कर्म्मलोचनम्॥

नामकरणं, क्ली, ( नाम्नः करणं यत्र।) संस्कारविशेषः। तच्चोक्तनक्षत्राणि यथा। अश्विनी १ रोहिणी ४ मृगशिराः ५ पुनर्व्वसुः ७ उत्तरफल्गुनी १२ स्वाती १५ अनुराधा १७ उत्तरा-